पेज - 1

- 31.7 × 10.6 × 0.1 c.m.

बक्तयान्यस्यस्तुति : क्रियते तत्रापि व्याजस्तुति

... ... - ..

स्वंच्यालयाप्रक्रियाया पत्रान्यगत स्तुति

पेज - 2

- 30.5 × 13 × 0.1 c.m.

ताडोपितेन पत्र प्राधिकीत्वाभा वादौसाद्ध्येतत

... ... - ..

छिन्न प्रतियोगिताकव्याप्यवृत्तीस्वसमाधि

—डरणापाव

NO-59

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वस्तपान्यस्यस्तुतिः क्रियते तत्रापि व्याजस्तुतिरेव अन्यस्तुतिव्याजेन तदन्यस्तुतिरित्य
र्थानामसद्भावात् यथा वा शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरो
त्तपः तरुणि येन तवाधरपाटलं दशति बिंबफलं शुकशावकः अत्र शुकशावकस्तुत्या
नायिकाधरसौभाग्यातिशयस्तुतिर्व्यज्यते निंदाया निंदया व्यक्तिर्व्याजनिंदेति गीयते विधे
स निंद्यो यस्ते प्रागेकमेवाहरच्छिरः अत्र हरनिंदया विषमविपाकं संसारं प्रवर्तयतो विधेः
निंदाभिव्यंग्या व्याजनिंदा यथा वा विधिरेव विशेषगर्हणीयः करट त्वं रट कस्तवाधः परा
सहकारतरौ चकार योऽसौ सहवासं सरलेन कोकिलेन अन्यस्तुत्याऽन्यस्तुत्यभिव्यक्ति
रिति पंचमप्रकारव्याजस्तुतिप्रकृतिवंदीभूते ये व्याजनिंदा ननु यत्रान्यस्तुत्याऽन्यस्तु
तिरन्यनिंदयान्यनिंदा च प्रतीयते तत्र व्याजस्तुतिव्याजनिंदालंकारयोरभ्युपगमे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शंसपनिवारिता: अत्रैवातताभन्या इत्यप्रस्तुतार्थादप्रमयन्या इति वैयर्थ्येण प्रस्तुतार्थः
प्रतीयत इति त्युक्त्यादि तत्र इयमेवाप्रस्तुतप्रशंसा नकार्यकारणनिबंधनेति इत्यमे
वात्रप्रस्तुतप्रशंसानिकार्यकारणनिबंधनेति उदाहरणं अप्रस्तुतप्रशंसा स्या
दप्रकांडेनुयागाति: पुंडजीवैरिहरिणा: वनेष्वपरासेविन: अपरैरपलसुलभै
र्जलदर्भांकुरादिभि: सेयमप्रस्तुतैवात्र मृगवृत्ति: प्रशस्यते राजानुवर्तनक्लेश
निर्विसि मनस्विनेति वस्तुतस्त्वत्र ब्रजस्तुतिरित्येवयुक्तं स्तुत्या निंदाभिव्यक्ति
रित्यत्राप्रस्तुतप्रशंसातो वैचित्र्यविषयविशेषसद्भावात् अन्यथाप्रसिद्ध ब्राजस्तु
त्युदाहरणेषु अप्रस्तुताभ्यां निंदास्तुतिभ्यां प्रस्तुते स्तुतिनिंदे गम्येते इत्येतावताव्या
जस्तुतिमात्रमप्रस्तुतप्रशंसा स्यात् एवंचानयापाप्रक्रियया यत्रान्यगतस्तुतिवि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न्ताकोपि तेन पत्रघटापिवीत्वाभावादौ साध्ये तत्तद्विपत्रावृत्तित्वाद्यवच्छिन्नप्रतियोगिताकाभा
वकूटाधिकरणमप्रसिद्धं तत्र सद्धेतौ घटापिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववत्तिसामान्या
दाववर्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ नाव्याप्तेरिति व्याप्तिर्वा नाप्यभाववत्वादिनाऽभावादौ
साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसिद्ध्याऽव्याप्तिरित्याहुः तन्न द्रव्यत्वघटापिवीत्वोभयवान्
द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववतिगुणादौ द्रव्यत्वादेरवृत्तेरतिव्याप्तेः अपि
च इदं घटापिवीव्यन्यत्वविशिष्टद्रव्यत्ववद्द्रव्यत्वादित्यादौ द्रव्यत्वत्वाद्यवच्छिन्नाभावकूटाधिकर
णगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्वादतिव्याप्तेः द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकं यद् घटापिवीव्य
न्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात् किंच रूपाभाववसाध्यकसद्धेतौ साध्याभावसमुदा
यनिविष्टसकलरूपव्यक्त्यधिकरणाप्रसिद्धेः यावतामभावानामेकाधिकरण्यं तावतां
तत्समुदायेपि विवक्षितेपि इदं घटापिवीवृत्तिगुणशून्यं सत्तान्यघटापिवीत्वसमवेतशून्यं वा

प

राम
5

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तित्वातिरिक्तं न समानाधिकरणेन साध्याभा
ववद्वृत्तित्ववृत्तिनावाधर्मेण नवच्छिन्नप्रतियोगिताको वा बोध्यः तेनालोकाद्यवृत्तित्वेन यो वान्हिसा
मान्याभाववद्वृत्तित्वस्य प्रत्येधनत्वाद्यवच्छिन्नवन्ह्यभावाधिकरणे भूतमहानसवृत्तित्वादेरभा
वत्त्वस्य धूमादौ सत्वान्निरुक्तसाध्याभाववद्वृत्तित्वादिरूपस्य हेतुत्वं तत्र वृत्तेः तस्मिन्नसत्वेपि न तति
रिक्ताप्रसङ्गः अन्येषु अन्येतु इति मद्दत्तयोपायं ततः साध्याभावसमुदायाधिकरणवृत्तित्वाभावात्तद्
त्वं तत्वम् तादृशवृत्तित्वाभावस्य त्वव्यापकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताकोवा
ध्यः प्रयोजनं चोक्तप्रायं साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्याधिकर
णधर्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तित्वाद्यभिचारिणप्रतिव्याप्तिरिति समुदायेति साध्या
भावश्च साध्यतावच्छेदकसंबंधेन बोध्यः तेन समवायेन वन्हेः साध्यत्वे धूमे संयोगेन च तत्पात्वे व
न्ह्यवयवत्वे पर्वतवन्ह्यवयवसंयोगे च पर्वतस्य वन्ह्यवयवस्य च संबंधद्वयावच्छिन्नवन्ह्यभाव
द्वयानधिकरणत्वेपि नातिव्याप्तिः तद्यात्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ दभावाधिकरणवृत्तित्वाभाववृत्तिमद्भिन्नयो यावन्तस्तत्त्वं आमि: केवलान्वयिनः संयोगाद्यभावस्या
भावाः संयोगादयो न व्याप्यवृत्तयः एवं साध्यस्य गुणसामान्यस्याभावोऽव्याप्यवृत्त्यधिकरणे उत्पत्तिकाला
वच्छेदेन वर्तमानोऽपि न व्याप्यवृत्तिः उक्तरूपावच्छिन्नप्रतियोगिताकाः क्वचिदप्रसिद्ध्यादिसंपादकाः
पुनरभावा न हेतुसमानाधिकरणाः उक्तसमुदायाधिकरणवृत्तित्वतदभाववृत्तिमत्त्वानिरूपकेति
रीत्या प्रत्येतव्यानीत्यादिकमपास्तम् तद्विशिष्टेति विशेषणतावच्छेदकाविशिष्टज्ञानस्याविशि
ष्टवैशिष्ट्यप्रत्ययहेतुत्वात् अभावप्रत्ययो हि घटत्वादिविशिष्टघटादेः प्रतियोगित्वमवगाहमा
नो विशेषणस्यापि घटत्वादेस्तदवच्छेदकत्वमवगाहते न तु स्वातंत्र्येण घटो नास्तीत्येव प्रतीतेः
तदिहाभावप्रत्ययो यदि व्यधिकरणधर्मेण विशिष्टं प्रतियोगिनं नावगाहते एवं तदा तस्यापि प्रति
योगितावच्छेदकत्वं अप्यावगाहते तर्हि भ्रम एव न च तन्नोपपत्तिरिति भावः यदि पुनरानुभविको
लोकानां व्यवहारो घटत्वेन पटो नास्तीति प्रत्ययो तदा तादृशाभावनिवारणं गीर्वाणगुरुणाप्य
शक्यमिति मंतव्यम् साध्येति साध्यस्य सामानाधिकरण्यं येषु तेषामनधिकरणत्वं तदभाववत्त्वमि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वायुत्वात् रूपवदन्यत्वादेर्यादावतिव्याप्तिः तत्र तादृशसाध्याभाववतो मस्य रूपादिघटितत्वेन तद्वति हेतो
रवृत्तेः वस्तुतो निखिलानामेव रूपाणां तादृशाभावस्य स्वसमानाधिकरणत्वात् समानाधिकरण
पावदभावाधिकरणाप्रसिद्धिर्दुर्वारैवेति किंच हेतुतावच्छेदकसंबंधेन या साध्याभाववति वृत्तित्व
 दभावो वक्तव्यः अन्यथा धूमादौ व्याप्तिः साध्यतावच्छेदकसंबंधेन साध्यस्याभाववति कालादौ वृत्ति
मत्त्वमात्रस्यैव व्याप्तिवादिनामतिप्रसंगो वा तथा च सत्तादिसाध्यके संयोगेन समवायेन वा हेतौ व
व्याप्तिः साध्याभाववति तेन संबंधेन वृत्तेरप्रसिद्धेः साधनसमानाधिकरणत्वेन साध्याभावविशे
षणीयः इति चेत् विशेष्यतां तथापि मूर्त्तत्वमूर्त्तत्वयोरन्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वादिरूपा
दावतिव्याप्तिः तत्र तादृशसाध्याभावसमुदायवति पृथिव्यादौ तस्यावृत्तेः किंच महाकालान्य
त्वादिसाध्यके व्यभिचारिणि कालिकविशेषणतया विशेषणेन घटादिहेतावतिव्याप्तिः तादृशसाध्या
भावसमुदायवति महाकाले तेन संबंधेन वृत्तिमत्त्वमात्रस्यैव वृत्तेः एतेन साध्यतावच्छेदकाव
च्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्ति स्वसमानाधिकरणपाव